International Journal of Sanskrit Research 2022; 8(3): 214-216

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(3): 214-216
© 2022 IJSR
www.anantaajournal.com
Received: 08-03-2022
Accepted: 10-04-2022

**डा. स्नेहलता**
अतिथिप्राध्यापिका,
शिक्षाशास्त्रविभागः, के.सं.वि.
श्री रणवीरपरिसरः, जम्मू,
जम्मू और कश्मीर, भारत

Corresponding Author:
**डा. स्नेहलता**
अतिथिप्राध्यापिका,
शिक्षाशास्त्रविभागः, के.सं.वि.
श्री रणवीरपरिसरः, जम्मू,
जम्मू और कश्मीर, भारत

# शिक्षाशास्त्रीयसंस्कृतशिक्षणे परामर्शस्य महत्त्वम्

**डा. स्नेहलता**

## प्रस्तावना

सृष्टिरचनायां ब्रह्मणः यत् स्थानम् अस्ति तदेव स्थानं समाजनिर्माणे एकस्य शिक्षकस्य भवति। सूक्ष्मातिसूक्ष्मचिन्तनं विधाय एकः शिक्षकः कालान्तरे उत्तमः समाजः कथं विकसितः भवेत् एतदर्थं छात्रनिर्माणे स्वीयं महत्तमं योगदानं ददाति अत एव शिक्षकः भविष्यनिर्मातृपदेन विभूष्यते। तत्रापि महत्त्वपूर्णं दायित्वं निर्वहति संस्कृतशिक्षकः, यस्य खलु प्रधानकार्यं भवति छात्रेषु संस्कृतिनिष्ठश्रेष्ठगुणानां निवेशनदायित्वम् । अमीषां हि उत्तमोत्तमशिक्षकाणां निर्माणे शिक्षकप्रशिक्षणसंस्थानां योगदानं नास्ति न्यूनम्। किन्तु वर्तमानभारते शिक्षाशास्त्रीयसंस्कृतशिक्षणे न तथा उत्कर्षः दृश्यते येन सुसंस्कृतसंस्कृतिनिष्ठानां संस्कृतभाषायां प्राप्ताधिकाराणां संस्कृतरक्षणैकचित्तानां शिक्षकाणां च निर्माणं कर्तुं शक्येत। अत एव वस्तुतः षष्ठं कक्ष्यारभ्य अपि संस्कृतं पठन्तः छात्राः कालान्तरे अङ्गुलिगण्याः एव संस्कृतस्य उच्चाध्ययनार्थं संस्कृतविश्वविद्यालयेषु प्रविशन्ति। तत्र कारणानि अनेकविधानि भवितुमर्हन्ति। तद्यथा- संस्कृताध्ययनाध्यापने समाजस्य अरुचिः अज्ञानं वा, संस्कृतभाषा कठिना इति भावः, संस्कृतमपि वैज्ञानिकमिति ज्ञानस्य अभावः, संस्कृतभाषया व्यवहाराभावः, संस्कृतशिक्षकाणामेव संस्कृतविषयकाभिरुचेः अभावादिकम् ।

शिक्षा तु मानवं प्रकाशयति समाजे उत्तम स्थानमवाप्तुं तं साधयति इत्यत्र नास्ति संशयः। उक्तमपि उपनिषदि "सा विद्या या विमुक्यते" इति। शिक्षा मुक्तिं प्रति नयति इति तु सत्यमेव किन्तु आधुनिककाले शिक्षाशास्त्रीयसंस्कृतशिक्षणं न साधारणं यतो हि आधुनिकसंस्कृतशिक्षणस्य स्थितिः अनवरतं ह्रियमाणा अस्ति। एवमेव अन्यविधशिक्षणमपि न तथा सुव्यवस्थितं दृश्यते अत एव सम्प्रति समग्रविश्वस्य मनोवैज्ञानिकाः सर्वविधशिक्षणे अपि निर्देशन-परामर्शयोः महत्त्वम् अवगत्य तद्द्वारा उत्तमशिक्षकाणां निर्माणे अहर्निशं प्रयतमाना दृश्यन्ते ।

शिक्षाशास्त्रम् अधीयानाः तत्रापि ये संस्कृतशिक्षणमधिकृत्य अध्यापनाभ्यासरताः सन्ति ते छात्राध्यापकाः अवश्यमेव क्वचित् निर्देशनं प्राप्य परामर्शं च प्राप्य अस्मिन् क्षेत्रे अध्ययनं कुर्वन्तः सन्ति । छात्राध्यापकावस्थायां यदि तेभ्यः अन्यविधप्रशिक्षणेन सह एव उचितः परामर्शः दीयते चेत् संस्कृतशिक्षणे निश्चयेन एव प्रगतिः भविष्यति । अतः शिक्षाशास्त्रीयसंस्कृतशिक्षणे परामर्शस्य महत्त्वमस्त्येव ।

परामर्शनं बह्वायामिप्रक्रिया अस्ति । यस्मिन् नैकेषां प्रविधीनाम् उपागमानां च प्रयोगेण कस्यापि जनस्य व्यक्तित्वस्य विकासाय समस्यासमाधानाय समायोजनसमस्यानां च समाधानाय प्रयत्नः विधीयते । परामर्शनं तादृशी प्रक्रिया वर्तते यत्र परामर्शस्वीकर्तुः परामर्शदातृमध्ये च अन्तर्क्रियात्मकपरामर्शनसम्बन्धः भवति । परामर्शनं सततप्रक्रिया अस्ति यत्र नैकविधाः अनुक्रमिकप्रक्रियाः भवन्ति । परामर्शनप्रक्रियायां परामर्शदाता स्वीयानुभवेन मनोवैज्ञानिकसिद्धान्तानाञ्चाधारेण परामर्शस्वीकर्तुः साहाय्यमाचरति । परामर्शनप्रक्रिया परामर्शस्वीकर्त्रे अधिगमपरिस्थितिमुत्पादयति यस्मात् व्यक्तेः लोकतान्त्रिकसहायता भवति । परामर्शनप्रक्रिया गृह-विद्यालय-उद्योग-चिकित्सालय-सामाजिक-सामुदायिककेन्द्र- पुनर्वासिकेन्द्रेषु प्रमुखरूपेण सम्पाद्यते । यतो हि परामर्शनस्य कार्यं विकासात्मकं निरोधात्मकम् उपचारात्मकं च भवति अतः अस्य मुख्यकार्यं भवति व्यक्तेः चिन्तनस्य दृष्टेश्च उन्मुखीकरणम् ।

परामर्शनस्य कार्यक्षेत्रं बहुविस्तृतं भवति । अर्थात् मानवजीवने यदा तस्य लक्ष्य-उद्देशादीनां परिवर्तनं निर्धारणञ्च भवति तदा परामर्शनस्य कार्यक्षेत्रमपि परिवर्तितं परिवर्धितं च भवति । शिक्षाशास्त्रीयसंस्कृतशिक्षणे संस्कृताय परामर्शनम् अपेक्षितमेव भवति । तदर्थं सर्वादौ छात्राणां मनोस्थितिः ज्ञातव्या भवति । सामान्यतः आधुनिककाले यत्र पाश्चात्त्यसंस्काराणां विकासः अत्यधिकः दृश्यते तत्रैव स्वदेशस्य उत्तमानां संस्काराणां निवेशः अग्रिमसंततौ करणीयश्चेत् सर्वप्रथमं संस्कृतशिक्षकाणां कृते परामर्शनस्य आवश्यकता महती वर्तते। संस्कृतशिक्षकाणाम् उत्तमः विकासः भवति चेत् ते एव भारतीयसंस्कृतेः अनुगुणं स्वविकासं सम्पाद्य अग्रे छात्राणाम् उत्तमोत्तमविकासं साधयितुं समर्थाः भवितुमर्हन्ति ।

इमे संस्कृतशिक्षकाः एव सुसंस्कृतदेशस्य भाविनिर्मातारः सन्ति। यदि ते उचितपरामर्शनस्य महत्त्वं छात्राध्यापकदशायामेव ज्ञास्यन्ति तर्हि ते प्रारम्भतः एव संस्कृतभाषाविषये संस्कृतशिक्षणविषये संस्कृतसंस्काराणां विषये च जागरूकाः भविष्यन्ति। अतः शिक्षाशास्त्रीयसंस्कृतशिक्षणे परामर्शनस्य महत्त्वं ज्ञातुं तस्य लक्ष्यमुद्देश्यं च पूर्वं सम्यक्तया ज्ञेयमेव।

परामर्शनप्रक्रियायाः प्रमुखं लक्ष्यं उद्देश्यं च भवति समायोजनक्षमतायाः विकासः। सामान्यतः एकः शिक्षकः सर्वस्यामप्यवस्थायां समायोजनं कर्तुं शक्नोति चेत् प्रत्येकमपि छात्रं सः स्वचिन्तनानुगुणं प्रवर्तयितुं समर्थः भवति । अत एव छात्राध्यापकेषु समायोजनक्षमता वर्धिष्यते चेत् ते शिक्षायाः विशेषतः संस्कृतशिक्षायाः विविधक्षेत्रेषु कार्यं कर्तुं योग्याः भविष्यन्ति। तानि क्षेत्राणि एवमुच्यन्ते -

**अवलम्बनम्** - छात्राः छात्रावस्थायां योग्यतानुसारं कार्यकुशलाः न भवन्ति कारणं तु अवलम्बनस्य न्यूनता भवति यदि तस्मै उचितसमये अवलम्बनं दीयते तदा ते यथायोग्यं साफल्यम् अधिगन्तुं शक्ताः भविष्यन्ति ।

**मनोशैक्षिकनिर्देशनम्** – अनेन निर्देशनेन विविधमनोवैज्ञानिकसमस्यानानां शैक्षिकसमस्यानां च समाधानं प्राप्तुं शक्यते । विशेषतः संस्कृतमध्येतुं न्यूनछात्राः एव आयान्ति तेषां रक्षणं तेभ्यः समुचितव्यवस्थाकल्पनं च वस्तुतः कष्टसाध्यमेव । उचितपरामर्शं प्राप्य न केवलं शिक्षकः अपि तु स छात्रः अपि स्वीयम् अध्ययनं समुचितप्रकारेण सम्पादयितुमर्हति ।

एवमेव निर्णयरचनायाः, समस्यासमाधानस्य, समायोजनस्य, आपद्कालीनहस्तक्षेप- प्रबन्धन-लक्षणोन्मूनयोः, अन्तर्दृष्टिविकासस्य, परिवेशस्य आत्मनः प्रति च सकारात्मकदृष्टिकोणस्य, जीवने सार्थकतायाः, अर्थबोधव्यवस्थाविकासस्य, व्यवहारपरिमार्जनस्य व्यक्तित्वपरिवर्तनस्य च क्षेत्रे परामर्शनं संस्कृतशिक्षकाणां कृते महदुपकारकं भवति। येन विविधप्रसङ्गानुसारं आत्मबलं प्राप्य छात्रसमस्यानां समाधानं कर्तुं पारयति शिक्षकः। अतः एतदर्थं शिक्षाशास्त्रिकक्षासु संस्कृतशिक्षणविषयमधिकृत्य अध्ययनं कुर्वतां छात्राध्यापकानां कृते परामर्शनम् अत्यन्तमुपकारी भवति । एवमेव समाजपरिवर्तनाय मानसिकस्वास्थ्य व्यक्तित्वस्य च संसाधनसम्वर्धनाय, प्रकार्यात्मकदृष्टेः सम्पूर्णव्यक्तित्वस्य च विकासाय आत्मसिद्धये च परामर्शनं संस्कृतशिक्षकेभ्यः छात्रेभ्यश्च परमावश्यकमेव।

इत्थं प्रत्येकमपि क्षेत्रे परामर्शस्य महत्त्वं दृश्यते। संस्कृतशिक्षणस्य उत्कर्षः यया गत्या अभिवर्धनीयः आसीत् तथा सम्प्रति न दृश्यते तथापि यदि प्रशिक्षकाणां शिक्षाशास्त्रीयछात्राध्यापकानां च शिक्षणे परामर्शशिक्षणं भवति तदा तस्य महत्त्वं भाविकाले अवश्यमेव भवति।

## सन्दर्भग्रन्थसूची


1. अल्तेकर, अनन्तसदाशिव. ; “प्राचीन भारतीय शिक्षा पद्धति”, नन्दकिशोर एण्ड ब्रदर्स, वाराणसी, १९६८
2. चौबे, सरयू प्रसाद, “भारतीय शिक्षा का इतिहास”, रामानारायण बेनीमाधव, इलाहाबाद, १९७१

3. सिंह, धर्मेन्द्र कुमार, ; “निर्देशन एवं परामर्श की प्रविधियां और परामर्श”, नोवेल्ती एवं कम्पनी प्रकाशन 2013
4. पाण्डेय अरविन्द कुमार ; “संस्कृत शिक्षा का विकास”, आदित्य बुक सेण्टर, दिल्ली, २००४
5. रुहेला एस.पी. ; “विकासोन्मुख भारतीय समाज में शिक्षक और शिक्षा”, विनोद पुस्तक मन्दिर, आगरा